संस्कृत
कोश

क्र.नं. 2

अमरकोश

त्र्यंबक रुद्राजी
भट वाईकर

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्रीगुरुभ्योनमः॥ यस्यज्ञा
नदयासिंधोरगाधस्यानघागुणाः॥ सेव्यतामक्षयोधीराःसश्रिये
चामृतायच॥ १ ॥ समाहृत्यान्यतंत्राणिसंक्षिप्तैःप्रतिसंस्कृतैः॥
संपूर्णमुच्यतेवर्गैर्नामलिंगानुशासनं॥ २॥ प्रायशोरूपभेदेन
साहचर्याच्चकुत्रचित्॥ स्त्रीपुन्नपुंसकंज्ञेयंतद्विशेषविधेःक्व

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(२)

२ ॥ चित् ॥ ३ ॥ भेदाख्यानाय न द्वंद्वो नैकशेषो न संकरः ॥ कृतोत्र भिन्न
लिंगानामनुक्तानां क्रमादृते ॥ ४ ॥ त्रिलिंग्यां त्रिष्विति पदं मिथुने
२ तु द्वयोरिति ॥ निषिद्धलिंगं शेषार्थं त्वंताथादि न पूर्वभाक् ॥ ५ ॥ रा
स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः ॥ सुरलोको द्योदिवौ द्वे
स्त्रियां क्लीबे त्रिविष्टपं ॥ ६ ॥ अमरा निर्जरा देवास्त्रिदशा विबुधाः ॥ १

(2A)

सुराः॥ सुपर्वाणस्सुमनसस्त्रिदिवेशा दिवौकसः॥ ७॥ आदितेया
दिविषदोलेखा अदितिनंदनाः॥ आदित्याऋभवोस्वप्ना अमर्त्या
अमृतांधसः॥ ८॥ बर्हिर्मुखाः क्रतुभुजोगीर्वाणा दानवारयः॥ वृंदा
रकादैवतानि पुंसिवादेवतास्त्रियां॥ ९॥ आदित्यविश्ववसवस्तुषि
ताभास्वरानिलाः॥ महाराजिकसाध्याश्चरुद्राश्चगणदेवताः॥ १०॥

T/[illegible]

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

२॥ विद्याधराप्सरोयक्षरक्षोगंधर्वकिंनराः॥ पिशाचोगुह्यकः सिधो

(3) भूतोमीदेवयोनयः॥११॥ असुरादैत्यदैतेयदनुजेंद्रारिदानवाः

॥ शुक्रशिष्यादितिसुताःपूर्वदेवाःसुरद्विषः॥१२॥ सर्वज्ञःसुगराम

तोबुधोधर्मराजस्तथागतः॥ समंतभद्रोभगवान्मारजिल्लोकजि

ज्जिनः॥१३॥ षडभिज्ञोदशबलोद्वयवादीविनायकः॥ मुनींद्रः २॥

(3A)

श्रीघनःशास्तामुनिःशाक्यमुनिस्तुयः॥१४॥ सशाक्यसिंहःस
र्वार्थसिद्धःशौद्धोदनिश्चसः॥ गौतमश्चार्कबंधुश्चमायादेवीसुत
श्चसः॥१५ ब्रह्मात्मभूःसुरज्येष्ठःपरमेष्ठीपितामहः॥हिरण्य
गर्भोलोकेशःस्वयंभूश्चतुराननः॥१६ धाताब्जयोनिर्द्रुहिणो
विरंचिःकमलासनः॥ स्रष्टाप्रजापतिर्वेधाविधाताविश्वसृड्वि

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

धि: ॥ १७ ॥ विष्णुर्नारायणः कृष्णो वैकुंठो विष्टरश्रवाः दामोदरो हृ

षीकेशः केशवो माधवः स्वभूः ॥ १८ ॥ दैत्यारिः पुंडरीकाक्षो गोविं

दो गरुडध्वजः ॥ पीतांबरोच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ १९ ॥ राम

उपेंद्र इंद्रावरजश्चक्रपाणिश्चतुर्भुजः ॥ पद्मनाभो मधुरिपुर्वासु

देवस्त्रिविक्रमः ॥ २० ॥ देवकीनंदनः शौरिः श्रीपतिः पुरुषोत्तमः ॥

(5A)

वनमालीबलिध्वंसीकंसारातिरधोक्षजः ॥ २१ ॥ विश्वंभरःकैटभ
जिद्विधुःश्रीवत्सलांछनः ॥ वसुदेवोस्यजनकःसएवानकदुंदुभिः ॥ २२ ॥
बलभद्रःप्रलंबघ्नोबलदेवोच्युताग्रजः ॥ रेवतीरमणोरामःकामपा
लोहलायुधः ॥ २३ ॥ नीलांबरोरौहिणेयस्तालांकोमुसलीहली ॥ संकर्ष
णःसीरपाणिःकालिंदीभेदनोबलः ॥ २४ ॥ मदनोमन्मथोमारःप्रद्युम्नो

कां०१ (८)

मीनकेतनः॥ कंदर्पो दर्पकोनंगः कामः पंचशरः स्मरः॥२५॥ शंबरारि

ई॥

र्मनसिजः कुसुमेषुरनन्यजः॥ पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः

भूर॥२६॥ ब्रह्मसूरीषकेतुः स्यादनिरुधउषापतिः॥ लक्ष्मीः पद्मालया राम

पद्माकमलाश्रीर्हरिप्रिया॥२७॥ शंखोलक्ष्मीपतेः पांचजन्यश्चक्रंसु

दर्शनं॥ कौमोदकी गदा खड्गो नंदकः कौस्तुभो मणिः॥२८॥ गरुत्मा ॥४॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan Mumbai

(5A) न्गरुडस्तार्क्ष्योवैनतेयःखगेश्वरः॥ नागांतकोविष्णुरथःसुपर्णःपं
न्नगाशनः॥२९॥ शंभुरीशःपशुपतिःशिवःशूलीमहेश्वरः॥ ईश्वरः
शर्वईशानःशंकरश्चंद्रशेखरः॥३०॥ भूतेशःखंडपरशुर्गिरीशोगि
रिशोमृडः॥ मृत्युंजयःकृत्तिवासाःपिनाकीप्रमथाधिपः॥३१॥उ
ग्रःकपर्दीश्रीकंठःशितिकंठःकपालभृत्॥ वामदेवोमहादेवो

अमर (८) पा० ५

॥५॥ विरूपाक्षस्त्रिलोचनः॥३२॥कृशानुरेताःसर्वज्ञो धूर्जटिर्नीललोहितः

॥हरःस्मरहरो भर्गस्त्र्यंबकस्त्रिपुरांतकः॥ ३३॥ गंगाधरोंधकरि

पुः क्रतुध्वंसीवृषध्वजः॥व्योमकेशोभवो भीमः स्थाणूरुद्रउमा राम

पतिः॥३४॥ कपर्दोस्यजटाजूटः पिनाकोजगवंधनुः॥प्रमथा

स्युःपारिषदा ब्राह्मीत्याद्यास्तुमातरः॥३५॥ विभूतिर्भूतिरैश्वर्य ॥५॥

(6A)

मणिमादिकमष्टधा ॥ उमाकात्यायनी गौरीकालीहैमवतीश्वरी ॥ ३६ ॥ शिवा भवानी रुद्राणी शर्वाणी सर्वमंगला ॥ अपर्णा पार्वती दुर्गा मृडानी चंडिकांबिका ॥ ३७ ॥ विनायको विघ्नराज द्वैमातुर गणाधिपाः ॥ अप्येकदंत हेरंब लंबोदर गजाननाः ॥ ३८ ॥ कार्तिकेयो महासेनः शरजन्मा षडाननः ॥ पार्वतीनंदनः स्कंदः सेनानीरग्नि[भू]र्गुहः ॥ ३९ ॥ बाहुलेयस्तारकजिद्वि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

॥६॥ शाखः शिखिवाहनः ॥ षाण्मातुरः शक्तिधरः कुमारः क्रौंचदारणः ॥
॥४०॥ इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः ॥ वृद्धश्रवाः सुना
(7) सीरः पुरुहूतः पुरंदरः ॥४१॥ जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्प राम
तिः ॥ सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥४२॥ वास्तोष्पतिः सु
रपतिर्बलारातिः शचीपतिः ॥ जंभभेदी हरिहयः स्वाराण्नमुचिसूदनः ॥६॥

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(7A) ॥४३॥ संक्रंदनोदुश्च्यवनःस्वुराषाण्मेघवाहनः॥ आखंडलःसहस्राक्ष

ऋभुक्षास्तस्यतुप्रिया॥४४॥पुलोमजाशचीद्रांणीनगरीत्वमरावती॥

हयउच्चैश्रवाःसूतोमातलिर्नंदनंवनं॥४५॥स्यात्प्रासादोवैजयंतोज

यं तःपाकशासनिः॥ ऐरावतोभ्रमातंगैरावणाभ्रमुवल्लभाः॥४६॥

ह्रादिनीवज्रमस्त्रीस्यात्कुलिशं विदुरंपविः॥ शतकोटिःस्वरुःशंबो

॥ ७॥ दंभोलिरशनिर्द्वयोः॥४७॥ व्योमयानं विमानोस्त्री नारदाद्याः सुरर्षयः॥ दा
(४) स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा ॥४८॥ मंदाकिनी वियद्गंगा स्व
न र्णदी सुरदीर्घिका ॥ मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः॥४९॥ पंचै राम
तेदेवतरवोमंदारः पारिजातकः॥ संतानः कल्पवृक्षश्च पुंसि वा हरिचंद
नं॥५०॥ सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ॥ नासत्यावश्विनौ ॥७॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

नेदस्रावाश्विनेयोचतावुभौ ॥५१॥ स्त्रियांबहुषप्सरसःस्वर्वेश्याउर्वशीमुखाः ॥
हाहाहूहूश्चैवमाद्यागंधर्वास्त्रिदिवौकसां ॥५२॥ अग्निर्वैश्वानरोवह्निर्वी
तिहोत्रोधनंजयः ॥ कृपीटयोनिर्ज्वलनोजातवेदास्तनूनपात् ॥५३॥ ब
र्हिःशुष्माकृष्णवर्त्माशोचिष्केशउषर्बुधः ॥ आश्रयाशोबृहद्भानुःकृशानुः
पावकोनलः ॥५४॥ रोहिताश्वोवायुसखःशिखावानाशुशुक्षणिः ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

॥ ९ ॥ हिरण्यरेताहुतभुग्दहनोहव्यवाहनः ॥ ५५ ॥ सप्तार्चिर्दमुनाः शुक्रश्चित्र
(१) भानुर्विभावसुः ॥ शुचिरप्पित्तमौर्वस्तु वाडवोवडवानलः ॥ ५६ ॥ वह्ने
र्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियां ॥ त्रिषुस्फुलिंगोग्निकणः संता राम
पः सज्वरः समौ ॥ ५७ ॥ धर्मराजः पितृपतिः समवर्तीपरेतराट् ॥ कृ
य तांतो यमुनाभ्राताशमनोयमराडयमः ॥ ५८ ॥ कालोदंडधरः श्राद्धदे ॥ ८ ॥

स्वर्गवर्ग

(9A)

वोवैवस्वतोंतकः॥ राक्षसः कौणपः क्रव्यात् क्रव्यादोस्रप आशरः॥ ५९॥ रा

न्यः त्रिंचरोरात्रिचरः कर्बुरो निकषात्मजः॥ यातुधानः पुण्यजनो नैर्ऋतो या

तु रक्षसी॥ ६०॥ प्रचेतावरुणः पाशी यादसांपतिरप्पतिः॥ श्वसनः स्प

र्शनोवायुर्मातरिश्वासदागतिः॥ ६१॥ पृषदश्वोगंधवहो गंधवाहानिला

शुगाः॥ समीरमारुतमरुज्जगत्प्राणसमीरणाः॥ ६२॥ नभस्वद्वातपव

अं०कां०१

॥९॥ नपवमानप्रभंजनाः॥ प्राणोपानःसमानश्चोदानव्यानौचवायवः॥ ६३॥

(१०) शरीरस्थाइमेरंहस्तरसीतुरयःस्यदः॥ जवोथशीघ्रंत्वरितंलघुक्षि

प्रमरंद्रुतं॥ ६४॥ [illegible] नःसमानोनाभिमंडले उदानः राम

[illegible] सत्वरंचपलंतूर्णमविलंबि

तमाशुच॥ सततेनारताश्रांतसंतताविरतानिशं॥ ६५॥ नित्यानव ॥९॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(10A)

रताजस्रमप्यथातिशयोभरः॥ अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भ

रं॥६६॥ तीव्रैकांतनितांतानिगाढबाढदृढानि च॥ क्लीबेशीघ्राद्यसत्वे

स्यास्त्रिषेषांभेद्यगामियत्॥६७॥ कुबेरस्त्र्यंबकसखोयक्षराड्गुह्यकेस

श्वरः॥ मनुष्यधर्माधनदोराजराजोधनाधिपः॥६८॥ किन्नरेशोवैश्रव

णः पौलस्त्योनरवाहनः॥ यक्षैकपिंगैलविलश्रीदपुण्यजनेश्वराः॥६९॥

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com